# द्वादश ज्योतिर्लिङ्ग स्तोत्रम्

सौराष्ट्रदेशे विशदेऽतिरम्ये ज्योतिर्मयं चन्द्रकलावतंसम् ।
भक्तिप्रदानाय कृपावतीर्णं तं सोमनाथं शरणं प्रपद्ये ॥ १॥

श्रीशैलशृङ्गे विबुधातिसङ्गे तुलाद्रि तुङ्गेऽपि मुदा वसन्तम् ।
तमर्जुनं मल्लिक पूर्वमेकं नमामि संसार समुद्र सेतुम् ॥ २॥

अवन्तिकायां विहितावतारं मुक्ति प्रदानाय च सज्जनानाम् ।
अकालमृत्योः परिरक्षणार्थं वन्दे महाकाल महासुरेशम् ॥ ३॥

कावेरिका नर्मदयोः पवित्रे समागमे सज्जन तारणाय ।
सदैवमान्धा तृपुरे वसन्तम् ओङ्कारमीशं शिवमेकमीडे ॥ ४॥

पूर्वोत्तरे प्रज्वलिका निधाने सदा वसन्तं गिरिजा समेतम् ।
सुरासुराराधित पादपद्मं श्रीवैद्यनाथं तमहं नमामि ॥ ५॥

याम्ये सदङ्गे नगरेऽतिरम्ये विभूषिताङ्गं विविधैश्च भोगैः ।
सद्भक्ति मुक्तिप्रद मीशमेकं श्रीनागनाथं शरणं प्रपद्ये ॥ ६॥

महाद्रिपार्श्वे च तटे रमन्तं सम्पूज्यमानं सततं मुनीन्द्रैः ।
सुरासुरैर्यक्ष महोरगाढ्यैः केदारमीशं शिवमेकमीडे ॥ ७॥

सह्याद्रि शीर्षे विमले वसन्तं गोदावरि तीर पवित्रदेशे ।
यद्धर्शनात्पातक माशु नाशं प्रयाति तं त्र्यम्बक मीशमीडे ॥ ८॥

सुताम्रपर्णी जलराशि योगे निबध्य सेतुं विशिखै रसंख्यैः ।
श्रीरामचन्द्रेण समर्पितं तं रामेश्वराख्यं नियतं नमामि ॥ ९॥

यं डाकिनि शाकिनिका समाजे निषेव्यमाणं पिशिता शनैश्च ।
सदैव भीमादिपद प्रसिद्दं तं शङ्करं भक्तहितं नमामि ॥ १०॥

सानन्द मानन्दवने वसन्तम् आनन्दकन्दं हतपाप वृन्दम् ।
वाराणसी नाथ मनाथनाथं श्रीविश्वनाथं शरणं प्रपद्ये ॥ ११॥

इलापुरे रम्य विशालकेऽस्मिन् समुल्लसन्तं च जगद्वरेण्यम् ।
वन्दे महोदार तर स्वभावं घृष्णेश्वराख्यं शरणम् प्रपद्ये ॥ १२॥

ज्योतिर्मय द्वादशलिङ्गकानां शिवात्मनां प्रोक्त मिदं क्रमेण ।
स्तोत्रं पठित्वा मनुजोऽति भक्त्या फलं तदालोक्य निजं भजेच्च ॥

॥ इति श्रीमद्शङ्कराचार्य विरचितं द्वादश ज्योतिर्लिङ्ग स्तोत्रं सम्पूर्णम् ॥